# Shivastutishlokasamnayanam 4

# શિવસ્તુતિશ્લોકસંનયનમ્ ૪

## Document Information

Text title : Shivastutishlokasamnayanam 4

File name : shivastutishlokasaMnayanam4.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | sadAshivAkhyaH navamAMshaH | shivastutishlokasaMnayanam 2 | vAvRRittashlokAH ||

Latest update : July 14, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 14, 2024

*sanskritdocuments.org*

# શિવસ્તુતિશ્લોકસંનયનમ્ ૪

(શિવરહસ્યાન્તર્ગતે નવમાંશે)
સૂતઃ ઉવાચ ।
જટાજૂટોરુશોભાઢ્યમસ્તકં ભૂતિભૂષિતમ્ ।
રુદ્રાક્ષસ્રગ્ભિરાકીર્ણં ત્રિપુણ્ડ્રાવલિભૂષિતમ્ ॥ ૨૫.૨૧॥

કુલાલઃ ઉવાચ ।
નમોઽસ્તુ તે દેવ દયાનિધે હર
પ્રપન્નપાલાવ્યય સોમમૌલે ।
વ્યાલોલવ્યાલામલ હસ્તશૂલ
નૌ પાહિ સર્વેશ્વર કાલકાલ ॥ ૨૫.૪૮॥

વણિક્ ઉવાચ ।
ગઙ્ગાચન્દ્રકલાસદુલ્લસઝરીસારસ્ફુરન્મૌલિ તે
કણ્ઠં તે શિતિકણ્ઠ કુણ્ઠિતગર શ્રીનીલકણ્ઠાધુના ।
વહ્નીન્દ્વર્કભવાક્ષકોણજકૃપાપાઙ્ગોલ્લસત્તે મુખં
પાદાબ્જં સુરમૌલિજાલમણિયુક્કાન્તં ભજે શઙ્કરમ્ ॥ ૨૬.૫૭॥

કૃષીવલઃ ઉવાચ ।
ભો ભર્ગ શાશ્વત વિભો ત્રિજગચ્છરણ્ય
રાકેન્દુધામવદનામલચારુમૂર્તે ।
વિશ્વેશ શાશ્વત વિભો શશિખણ્ડચૂડ
મામદ્ય પાહિ કરુણાવરુણાલયેશ ॥ ૨૮.૪૨॥

પશુપતિઃ (ભક્તઃ ઉવાચ) ।
નમસ્તે રુદ્રં વા શ્રુતિશિરગમન્યોઽહમિષુમાન્
નમસ્તે બાહુભ્યાં તવ શિવખરેષૂદ્યતકરઃ ।
શરવ્યા હેતિભ્યાં તવ વરદ સઙ્ક્ષુબ્ધ ધનુષે
તવેશસ્યાહૃદ્યા તનુરપિ મનો મેઽદ્ય પદયોઃ ॥ ૪૦.૪૧॥

હિરણ્યો દેવસ્ત્વં નખશિખમુખા તે નયનયોઃ
તનું સમ્પશ્યન્ વૈ ભવ શિવ નમઃ સોમ વપુષે ।
અતોઽણીયઞ્જ્યાયાન્ શ્રુતિકલિતવાક્યાર્થકલનૈઃ
નમઃ શેષી દેવઃ શ્રુતિગદિત પઞ્ચાક્ષરમનોઃ ॥ ૪૦.૪૨॥

બાલઃ (જ્ઞાનસમ્બન્ધ) ઉવાચ ।
શમ્ભોભર્ગભવાન્તકાવ્યય વિભો પાહ્યમ્બુજાક્ષણા-
લોક્યામૌલિસુમૂલ ભાલવિલસન્નેત્રપ્રભાભાસિત ।
(શમ્ભોભર્ગભવાન્તકાવ્યય વિભો પાહ્યબ્જજાબ્જેક્ષણા-
ક્ષ્યોત્તુઙ્ગશિરઃસુ ભાલવિલસન્નેત્રપ્રભાભાસિત ।)
આલોલદ્યુતિ સોમસુન્દર જટાજૂટાત્તગઙ્ગોત્તમ
વ્યાલાનદ્ધશરીરકાન્ત ગરજિચ્છીરઞ્જિતાઙ્ગ પ્રભો ॥ ૪૬.૩૮॥

દભ્રગૃહે શિવદર્શનવર્ણનમ્
સોમં સોમલલામગાઙ્ગસુજટાચૂડં મૃડં શઙ્કરં
સોમાર્કાનલલોચનં ગરગલં વૈયાઘ્રચર્મામ્બરમ્ ।
મન્દસ્મેરમુખામ્બુજં ચ સુમહાબાહું પ્રભાભાસુરં
શૂલોદ્યન્મૃગટઙ્કં પદનતામર્ત્યાવૃતં શઙ્કરમ્ ॥ ૫૬.૩૯॥

દભ્રઃ ઉવાચ ।
શમ્ભો પાહિ મહેશ સોમશકલાલઙ્કારમૌલે હર
સ્વામિન્ દેવ દયાનિધે કરુણયા માં પાહિ સર્વેશ્વર ।
ત્વં વિશ્વાધિક વેદવેદ્ય ભગવન્ કારુણ્યવારાન્નિધે
ધન્યોઽસ્મીશ ભવત્પાદામ્બુજરસાસ્વાદૈકસન્માનસઃ ॥ ૫૬.૪૧॥

વૈશ્યઃ (ઉવાચ) ।
ભો શમ્ભો ત્રિજગચ્છરણ્ય કરુણાતારુણવારાં નિધે
પાહીશ પ્રમથાધિનાથ ગરધૃક્ વિશ્વેશ વિશ્વાધિક ।
વિશ્વાશાસ્ય વિભો વિભૂષણમહાકાકોદરાકન્ધર
સોમાનદ્ધ કિરીટકોટિવિલસદ્ભસ્માઙ્ગરાગારુણ ॥ ૬૧.૩૧॥

વીરશાર્દૂલોવાચ
હર હર દુરિતાનિ દીનબન્ધો
કુરુ મમ બન્ધવિમોચનં ભવાદ્ય ।
પરિહર સંસૃતિભારમુગ્રખેદં

ગુરુગ્ગરલાશન દેવ દેવ પાહિ ॥ ૨૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવસ્તુતિશ્લોકસંનયનમ્ ૪ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । સદાશિવાખ્યઃ નવમાંશઃ । શિવસ્તુતિશ્લોકસંનયનમ્ ૨ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . sadAshivAkhyaH navamAMshaH . shivastutishlokasaMnayanam 2 . vAvRRittashlokAH ..

Notes:
The shlokas for eulogizing Shiva; that eventuate sporadically in various Adhyaya-s of Shiva Rahasyam Amsa-09, are collated on this page.

Proofread by Ruma Dewan

---

*Shivastutishlokasamnayanam 4*
pdf was typeset on July 14, 2024

Please send corrections to *sanskrit@cheerful.com*